श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १५

*कपिलोपदेशम्*

मतिरिह गुणसक्ता बन्धकृत्तेष्वसक्ता-
    त्वमृतकृदुपरुन्धे भक्तियोगस्तु सक्तिम्।
महदनुगमलभ्या भक्तिरेवात्र साध्या
    कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ १॥

प्रकृतिमहदहङ्काराश्च मात्राश्च भूता-
    न्यपि हृदपि दशाक्षी पूरुषः पञ्चविंशः।
इति विदितविभागो मुच्यतेऽसौ प्रकृत्या
    कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ २॥

प्रकृतिगतगुणौघैर्नाज्यते पूरुषोऽयं
    यदि तु सजति तस्यां तद्गुणास्तं भजेरन्।
मदनुभजनतत्त्वालोचनैः साऽप्यपेयात्
    कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ ३॥

विमलमतिरुपात्तैः आसनाद्यैर्मदङ्गं
    गरुडसमधिरूढं दिव्यभूषायुधाङ्कम्।
रुचितुलिततमालं शीलयेतानुवेलं
    कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ ४॥

मम गुणगणलीलाकर्णनैः कीर्तनाद्यैः
    मयि सुरसरिदोघप्रख्यचित्तानुवृत्तिः।
भवति परमभक्तिः सा हि मृत्योर्विजेत्री
    कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ ५॥

अह ह बहुलहिंसासञ्चितार्थैः कुटुम्बं
प्रतिदिनमनुपुष्णन् स्त्रीजितो बाललाळी।
विशति हि गृहसक्तो यातनां मय्यभक्तः
कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ ६ ॥

युवतिजठरखिन्नो जातबोधोऽप्यकाण्डे
प्रसवगलितबोधः पीडयोल्लङ्घ्य बाल्यम्।
पुनरपि बत मुह्यत्येव तारुण्यकाले
कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ ७ ॥

पितृसुरगणयाजी धार्मिको यो गृहस्थः
स च निपतति काले दक्षिणाध्वोपगामी।
मयि निहितमकामं कर्मतूदक्पथार्थं
कपिलतनुरिति त्वं देवहूत्यै न्यगादीः॥ ८ ॥

इति सुविदित वेद्यां देव हे देवहूतिं
कृतनुतिमनुगृह्य त्वं गतो योगिसङ्घैः।
विमलमतिरथाऽसौ भक्तियोगेन मुक्ता
त्वमपि जनहितार्थं वर्तसे प्रागुदीच्याम्॥ ९ ॥

परम किमु बहूक्त्या त्वत्पदाम्भोजभक्तिं
सकलभयविनेत्रीं सर्वकामोपनेत्रीम्।
वदसि खलु दृढं त्वं तद्विधूयामयान् मे
गुरुपवनपुरेश त्वय्युपाधत्स्व भक्तिम्॥ १० ॥

**********